M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref. / Ser. 1419

Title : Pratistha Mayukha
(Bhaskar)

1419

Incomplete

C

Pratishtha Mayukh (Bhaskar) : Title

Nilkanth : Author

: Editor

: Year, Vols.

SK : Publisher

1419 : 27 6 36 : Remarks

दकंयवान्पुष्पाणिफलानिचक्रमेणनिक्षिप्यस्थापनक्रमेणकुंभैः स्नापयेत् ॥ आपोहिष्ठेतितिसृ चहरण्य
र्णाः शुचय इति चतसृयां पवमानः सुवर्जनं इत्यनुवाकश्चेति ततो वाससी परिधा योपवीतं दत्वा गंधपुष्प
धूपदीपैः संपूज्य पैष्टैरष्टभिर्दीपैर्नीराज्य हिरण्यगर्भ इति त्र्यष्टभिः हिरण्यशलाकां गृहीत्वा चित्रं देवाना
मित्यनेन देवनेत्रे उन्मील्यां जंति त्वाम ध्वरमि सं जपित्वा पुनर्मधघृतशर्कराभिर्दैवस्य त्वेति जपेत् ॥
मंत्रांते अनल्मीति वाक्यशेषः ॥ ततो नेत्रस्य भोज्यादि दर्शयेत् ॥ तदाग्रे कोपि न तिष्ठेत् ॥ ततो दर्भैर्घासीनो दर्भा
न् धारयमाणः पुरुषसूक्तेन स्तुत्वा वंशपात्रे पंचवस्त्रान्वितमन्नं प्रक्षिप्य देवं नाराज्य तु नमो भूताधिपतये
वादी नमस्थलधरायोमापतये सर्वविद्याधिपतये रुद्रायनमः त्रिविक्रमगर्हितिः कर्मात्मस्वाहेति बलिं दत्वा चा
मेत् ॥ ततो मंडलदेवतानां गंधादिना संपूज्य स्थाप्य देवं तं तलिंगमंत्रैरावाह्य कर्णिकायां प्रतिष्ठाप्य गंधादि
संपूज्य कुंडे मंडलदेवतानाममंत्रैर्दद्यातिलाज्याहुतीः ॐ लोनाप्याया देवमारोप्य पुरुषसूक्तेन नरनारायण
म्यां बालैः सहोपतिष्ठेत् ॥ ततो देवे पुरुषात्मने नमः प्राणात्मने नम इति द्वारा रे व्यापकं न्यसेत् प्रकृतित

प्रम.
॥२१॥

त्वा पनमो॥ रसतत्वाय वक्त्रे॥ गंधतत्वाय पादयोः॥ श्रोत्रतत्वाय कर्णयो॥ त्वक्तत्वाय सर्वशरीरे॥ चक्षुतत्वा

य चक्षुषो॥ जिह्वातत्वाय जिह्वायां॥ घ्राणतत्वाय घ्राणे॥ वाक्तत्वाय वाचि॥ पाणितत्वाय पाणेपा॥ पादतत्वा

य पादयोः॥ पायुतत्वा पायौ॥ उपस्थतत्वायोपस्थे॥ पृथ्वीतत्वाय घ्राणे॥ आकाशतत्वाय शिरसि॥ रजत

त्वाय॥ तमस्तत्वाय॥ सत्वतत्वाय॥ देहतत्वायेति देहे॥ ततोपि पुरुषसूक्तं न्यासं कृत्वा संन्याधिवासयेत्॥ ततो

मंडलमध्ये न गंतव्यं॥ मंडलदेवतानां सुप्रहारनिवेदनं॥ तत्र सर्वत्र ब्रह्मणे॥ घृतान्नं सोदकमिश्राय आज्यान्नम॥

ग्नये माषान्नयमाय॥ हस्त्रवी ह्यन्नं सघृतं निर्ऋतये॥ नवनीतोदनं वरुणाय॥ यवोदनं वायवे॥ प्रियंगवे सोमा

य॥ गावक्षुक्रमीशानाय॥ पायसं वा सर्वेभ्यः॥ ततः शय्याप्रदेशे नैवारं चरुं स्थापयित्वा तेन हविं जिह्वत्वाग्नि

शानये दिक्षि चिवासनं॥ प्रातः पुरोदया दृष्ट्वे सुस्थाप्य मूलमंत्रेण पक्षघृते चरुः॥ अपयित्वाग्निघार्य मूल

मंत्रेणाष्टोत्तरसहस्रमष्टशतं वा ऊघृतं तावत् कृत्वाग्नये स्वाहा॥ सोमाय स्वाहा॥ धन्वंतरये स्वाहा॥ कुह्वै स्वा प्रम:

हा॥ अनुमत्यै॥ प्रजापतये परमेष्ठिने॥ अग्नये सोमाय॥ अग्नयेन्नादाय स्वाहा॥ अग्नयेन्नपतये स्वाहा॥ ७६३॥

जापतये स्वाहा य॥ विश्वेभ्यो देवेभ्यः स्वाहा॥ सर्वेभ्यो देवेभ्यः स्वाहा॥ सर्वेभ्यः भूतेभ्यः स्वाहा॥ भूर्भुवः स्वः॥ अग्न

ये स्विष्टकृते स्वाहेति जुहुयात्॥ ततो यजमानो गुरवे वरं दद्यात्॥ ततो उदिते सूर्ये गुरुर्वेद्यां मेवाग्निमुखे देवे

वं कृत्वा रक्तपुष्पफलैः षधादि दर्शयित्वा ताम्रपात्रे शांतिजलमादाय मूलमंत्रेण शतवारमभिमंत्र्य देवशि

रसि॥ आसिच्योत्तिष्ठ ब्रह्मणस्पत इत्यनेनोत्थाप्य विश्वतश्चक्षुरिति पुरस्थाप्य देवस्य पुरस्तात्॥ ॐ ब्रह्मविष्णुरुद्रे

भ्यो नमः॥ ॐ वैदिक्पालेभ्यो नमः॥ वसुभ्यो नमः॥ रुद्रेभ्यो नमः॥ आदित्येभ्यो नमः॥ अश्विभ्यां॥ मरुद्भ्यो नमः॥ कुवेराय

॥ गंगादि महानदीभ्यो नमः॥ अग्नीषोमाभ्यां नमः॥ इंद्राग्नीभ्यां नमः॥ द्यावापृथिवीभ्यां नमः॥ धन्वंतरये॥ सर्वे

भ्यो य॥ विश्वेभ्यो देवेभ्यः॥ ब्रह्मणेभ्यो नमः॥ इति जप्त्वा देवस्य पुरतो यजमानमभिषिंच्य देवमंत्रं जप्त्वा कृत्वा

के नतद्धिंगमंत्रेण पुरुषसूक्तेन गाथा व्याहृति निर्देवप्रतिष्ठाप्य प्रतिमायां निजवाहनायुधपरिवा

राङ्गिक ध्यात्वा पुनः पूजयित्वा मुंडाप्रदरूप मूलमंत्रमष्टोत्तरशतं जप्त्वा नत्वा च भूयात्स्विष्टकृद्धवनं तरां

गानि समापये॥ ततो यजमानो दक्षिणां दद्यात् द्विजान्भोजयेय धाशक्ति च लाभप्रतिष्ठा॥ अथ प्रजाणे

प्र.म.
॥२८॥

द्धारविधिः॥ अग्निपुराणे॥ जीर्णादीनां च लिंगानां उद्धारविधिमावदेत्॥ लक्ष्मोज्झितं च भग्नं च स्थूलं वज्रहतं तथा
संपुटस्फुटितं लिंगं लिंगमित्येवमादिकाइत्यादि — दुर्गानात्याज्यापिडीतथा वृषः॥ लक्ष्मोज्झितं ब्राणादि
भ्रमेणतद्विधिनास्थापितं सलक्षणरहिता भग्नमनेकधा कलीकृतं॥ स्थूलं पिंडिकाननुरूपं वज्रहतं विद्यु
द्धतं संपुटं तुच्छं स्फुटितमेकदेशे भग्नं॥ व्यंगं पिंडिकाप्रणालादिरहितं॥ आदिपदेन वक्र अलस्पष्टादीनां ग्रहण
पिंडीवृषयोर्दुष्टत्वेनयोरेवत्यागो न लिंगस्य॥ चलितं चलितं निम्नमस्यं विषमस्थितं॥ दिङ्मूढं पतितं लिंगं मध्य
स्थं पतितं तथा॥ एवंविधं च संस्थाप्यं निर्व्रणं च भवेद्यदि॥ देवेनप्रवाहेण तदपाक्रियते यदि॥ ततोन्यत्रापि
संस्थाप्यं विधिदृष्टेन कर्मणेति॥ निम्नं सामं तन्नागानिम्नायां भूव्यवस्थितं॥ विषमस्थितं यत्र पूजादिकर्तुं
नशक्यते तस्मिन्देशे व्यवस्थितं॥ दिङ्मूढं विशेषविध्यभावे पिंडगतिरिक्तदिक्प्रणालीकं पातितं गर्तादौ
मध्यस्थं संपूर्णपिंडिकामध्ये न्तर्गतं॥ प्रासादमध्यभागे स्थितमिति पि के चित्॥ एवंविधमित्यनेन लक्ष्मोज्झितः भ
ग्न॥ स्फुटितविद्युद्धतातिरिक्तानां ग्रहणं तेन जघन्यो निर्व्रणत्वाद्योपि लक्ष्मोज्झिताद्यतिरिक्तानामेवोप

रामः
॥७८४॥

लक्षकः पीवाश्चचलितं लिंगं निर्दोषं तु भवेद्यदि॥ ततो पि स्थापयेत्तत्र जपेल्लक्षमघोरकं॥ स्वजेष्टदोषितं लि
गं म्लेच्छाद्यैश्च सेवितं॥ लिंगांतरं प्रतिष्ठाप्य विशुद्धिमधिगच्छतीति सिद्धांतशेखरे॥ तत्रैव लिंगगाद्धि
कायाश्च प्रतिमास्वरलिंगयोः॥ सर्वेषां परिवाराणां हर्म्यप्राकारयोस्तथा॥ उद्धारश्चावृत्तिः प्रोक्ता यो द्वारे हेतु
रुच्यते॥ आवृत्तिः पुनःसंस्कारः स्फुटितं खंडितं भग्नं दग्धं वाशनिनाग्निना॥ उन्मत्तैः शत्रुभिश्चौरैः करिणा
खातसारुते॥ लिंगे पावादिकं वापि विश्लेषकापर्ययात्॥ देहजीर्णं यपादेहात्स्कात्सडुपगच्छति॥ लिं
गादीन्यतिजीर्णानि तथा चबस्तराहसा॥ कर्तनंपाणराष्ट्रस्यतत्क्रमस्य विशेषतः॥ पीडां कुर्वंति तेषां तु
यादुर्निमित्तं मरणादिकं॥ तस्मात्सर्वप्रयत्नेन कुर्याद्धुद्धरणक्रिया स्वायंभुवे च दैवे च बाणलिंगे तथैव च॥ ऋषि
निश्चासुरैदैवतैर्वा विद्धि प्रतिष्ठितं॥ लिंगे जीर्णादिदुष्टेपि नोद्धारं तत्र कारयेत्॥ इदमपि स्वायंभुवादिव्यक्ति
विषयं नतु दैवात्तद्धक्तिनाशे न तत्स्थानस्थापिते दनातनतादृशी अक्तिविषयं॥ स्वायंभुवादिलिंगानां जीर्ण
पीवं परित्यजेत्॥ उक्ते जीर्णादिजीर्णे दुष्टं मानुषं तु परित्यजेत्॥ दिङ्मूढं पतितं स्थानात् मध्यस्थं सोतसाहृतं चो

प्र.म.
॥२९॥

राधैश्चालितंलिंगंस्थापयेन्निर्व्रणंपुनः। लोहाद्यछिन्नभिन्नांगसंधायस्थापयेत्पुनः। सुवर्णाद्यष्टलोहनिर्मि
तंलिंगंदेवाङ्गंसत्वदेवसज्ञकृत्वापुनःस्थापयेदितिमच्च्यः। बाहुपादशिरोहीनांकर्णनासास्यहीनकां ता
दृशीपरिवाराणांप्रतिमांपरिवर्जयेत्। पुरुषयत्नमाणांचलिंगंवाप्रतिमापिवा। तादृक्कृतेनैवमानेन
तद्द्रव्येणप्रकल्पयेत्। कारयेन्न्यायमानेनान्यद्रव्येणतत्पुनः। नान्याकारंचनान्यत्रस्थापयेत्सुरोत्तमः।
स्रोतसापहृतेलिंगेप्रासादेवातदन्यतः। तत्समापगतेदेशेस्थापयेद्ध्नवर्जिते। प्रासादेपतितेहर्म्येगो
पुरेमंडपादिके। तदाकारंचतत्तद्द्रव्यैस्तन्मानंतत्रकारयेत्। कर्मयोग्याह्याद्दढकाश्वतथाविधाहीनद
व्यक्ततंहमंथिछेद्वैध्यैःसमाचरेत्। कर्महीनंवाप्यधिकंमानमाकारंवानकारयेत्। एवमुक्तेनमार्गेणदो
षेतक्षैर्विचार्यच। लिंगपीठादिकंजीर्णंतद्विद्धरेति। यत्पिन्द्रनवारादितपर्यंतविदारयेत्। जीर्णचोद्धार
येद्विद्वानजीर्णंचैवचालयेत्। जीर्णस्यधारणेदोषस्त्वजीर्णमजीर्णरक्षयेद्बुधा। सुस्थितंतद्दु स्थितंवापिशि ।म:
वलिंगंनचालयेत्। अतेनस्थापनंकुर्यात्सहस्रेणापिचालयेत्। अस्यश्लोकस्यवाक्यार्थोपएपतेयपा ॥७८५॥

गमंनित्यपूजादिभिर्युक्तंजीर्णमप्यपिसुस्थितं। हीनंपूजादिभिर्लिंगंत्वजीर्णमपिदुःस्थितं। देवतास्था
पितंमोहामोहाग्निम्लत्वमागतं। तल्लिंगंदुःस्थितंत्वज्ञैरितिनिश्चितं। सहस्रादिकहोमेनतस्यचालनमारि
तं। स्थापनंशतहोमेनस्युचोदितं। एवंबहुविधैस्तैस्तैर्दोषास्त्वबहुचोदिता। परीक्ष्यबहुचोदितंत्वजीर्णलिं
गंसमुद्धरेत्। हयशीर्षागमेपिजीर्णोद्धारविधिरुक्तस्तंसंक्षेपात्प्रब्रवीमिते। चालितोस्था~दितोभूमिकेन॥
चित्यापकर्मणा। चंडालवत्ससंस्पर्शदूषितादूषिताचया। स्वयमापतिताजीर्णानद्यावेगादिपातिते। अपु
ण्यजलसंस्पृष्टाविप्रहृताजदूषितापतितत्याचितासेष्माविण्मूत्रादिविदूषिता। सव्रणालक्षणोपेतासंस्का
र्यादेशिकेनतु। भूमिलिंगमीश्वरप्रतिमाचचंडालवतीतत्स्पृष्टा। अन्यसंस्पर्शेनिषिद्धस्यतुजीर्णालोकालबा
कूल्येनद्वारादिसंबंधेनयविशीर्णासिव्रणा। एकदेशेभग्नादिशिवत्पासक। पूर्वोक्तेनविधानेनवैदिकेनतु
रोत्तम। अत्रचलक्षपितामेवंस्थापयेद्विधिनाहृतां। पूर्वोक्तेनचलाचोपप्रतिष्ठाप्रकारेण। एवंविधिनोहृता
पात्यन्वयः। वक्ष्यमाणप्रकारेणोद्धृतामित्यर्थः। पूर्वपाठंपरित्यज्यपदन्यदपितकृतं। तनोयथोक्तविधि

प्र.म.
॥३०॥

न्त्र प्रासादे सं निवेशयेत्॥ दुरं पूर्वासनं परित्यज्य॥ न्यस्मिंस्तस्मासादग जन्यासनेयथोक्तेनाचण्नाचौस्थापन
प्रकारेणपुनःस्थापयेदित्यर्थः॥ अतिजीर्णांगीतप्राव्यंगंदार वीरौ लजाम परित्यज्य न्यनसेदन्या पूर्वोक्त
विधिनागुरुः॥ संहारविधिनागुरुः॥ संहारविधिनातत्रमंत्रामंत्रासं रूपदेशिका॥ सहस्रंनारसिंहेन जुहुया
तानुद्धरेद्गुरुः॥ संहारविधिंप्रातिलोम्येन॥ मंत्रान्कल्पा॥ संकूर्मोप्युत्पा॥ नारसिंहमंत्रेण॥ होमद्रव्यमा
ज्यमन्यानादेशात्॥ वृषंसंयोजयित्वातुमंत्रेणैवबाह्यदेशिकः॥ दारवीदाहयेद्गुरुः शैलजं प्रक्षिपेतजले॥ तुजारल
जांवापि प्रक्षिपेन्मकरालये॥ अगाधेचान्यतोयेच क्षिपेल्लघ्यामहाजले॥ वृषवृषोवारज्यासंयोज्यमं
त्रेणपाशुपतेनोद्वाहयेदितित्रिविक्रमः॥ पानमारोप्यजीर्णां वाछाद्यावस्त्रादिनागुरुः॥ शंखदुंदुभिनि
र्घोषैर्गीतवादित्रनिस्वनैः॥ नीत्वागाधंजलंरम्यं नागीरथ्यामतार्णवे॥ विकक्रसेनापवार्येणप्रक्षिपत्तोत
तोगुरुः॥ पानमारोप्येत्यादिपूर्वोक्तएवप्रतिपादन इतिकर्तव्यतोत्यर्थः॥ विष्वक्सेनोद्देशेनवीर्येणबीजे
नैगुरुः॥ नागीरथ्यादिजलेनां प्रतिमां क्षिपेदित्यर्थः॥ रत्नानिनिक्षिप्तान्यादाय स्वयंदद्यात्तुदक्षिणां॥ धेनवो

रामः
॥७८६॥

दशावायंचवस्त्रवस्त्राद्यलंकृता॥ जीर्णोद्धारे प्रदातव्याः गुरवे विष्णुतुष्टये॥ लिंगात निक्षिप्तानिरत्नान्यादायस्व
यं यजमानो दश धेनूः॥ पंचवा हेमवस्त्राद्यलंकृतागुरवे दक्षिणांदद्यादित्यर्थः॥ भोजनीयाविष्णुनक्तादियमममवा
रितं॥ त्रिरात्रमुत्सवः कार्यः पंचसप्तअथापिवा॥ बलिश्चविधिनादेयोयथोक्तेनसुरोत्तम॥ यथोक्तेनाब्जाचा
प्रतिष्ठैकप्रकारेण॥ ततोनिवेदयेद्द्रव्यं प्रतिमाजक्षणान्वितां॥ निवेदयेस्थापयेत्॥ ततूक्षणादेवराजेंद्र॥ तस्य
दोष स्याद्भ्रांतये॥ संप्रक्षिर्वाविपत्तिर्वानोपेक्ष्यातत्रकारयेत्॥ छायायस्यापिंडिकापूर्वंस्थापांतत्रनिवेशयेत्
यत्प्रमाणायज्ञकोरंध्रमायत्प्रमाणाच्चयामूर्तिश्चोद्धृताहरे॥ तद्ध्यातात्प्रमाणाच्चसामूर्तिस्तत्रकीर्तिता
॥ यत्प्रमाणंयज्ञकारंध्रमंयंबिबमुद्धरेत्॥ तत्प्रमाणंतदाकारंतन्मानेतत्रविन्यसेत्॥ विहायपिंडिकांपूर्वांत
द्दिनेचापरान्यसेत्॥ द्वितीयेवात्तृतीयेवा दिवसेस्थापयेद्धरिं॥ अतऊर्ध्वंनिवेशेषोविधिनापिनिवेशिते॥ अप
नेनैवविधानेनलेप्यादीनक्षविसर्जयेत्॥ कुज्वलितखिता॥ प्रतिष्ठापिताः प्रतिमालेप्या॥ अन्यदिककल्पयेतत्र
तत्प्रमाणंतदाकृति॥ एषसंक्षेपतःप्रोक्तोजीर्णोद्धारविधिस्तवा सर्वेषामेवदेवानांएषसाधारणःस्मृतः॥ यो

प्र.म.

जीर्णविधिनाबिंबंसंस्कुर्यान्म नवोस्तुविफलंदशगुणंतस्यमूल्यात्मन्नसंशयः वापीकूपतडागानांसुर

३१ धाम्नांसदानघ प्रतिमानांसभानांचसंस्कर्त्ता योनरोस्तुवि पुण्यंपशतगुणंतस्यभवेन्मूल्यानसंशयः सं

स्थायोवनकर्त्तव्योजीर्णसंस्कारकर्मणि मूल्याद्दशगुणंप्रोक्तं पुण्यंकूपेप्रतिमायात्रातगुणंकूपादेः परि

कीर्तितं प्रतिमादौदशगुणयोरल्पस्वमहत्वापेक्षयाव्यवस्था अग्निपुराणे सुस्थितंदुःस्थितंवापिशि

वलिंगंनचालयेत् शतेनस्थापनंकुर्यात्सहस्रेणतुचालनं पूजादिभिश्चसंयुक्तंजीर्णमपिसुस्थितं च

यंचचाननिषेधौविधिव्यतिरेकेणशतसहस्रसंख्येयुक्तसंख्येयत्वाज्ञोगते गोश्चाश्वेत्यन्येवबहूपकारि

त्वाधःसहस्रंशतात्रमित्यादेवाकुर्य्यातदर्शनाद्दोतिन्यायविदः सिद्धांतशेखरेतु होमगतेयंसंख्येत्युक्तं य

दपितन्नैव अमरैर्मुनिभिर्वैवैस्तत्वविद्भिःप्रतिष्ठितं जीर्णंवाप्यथवाभग्नंविधिनापिनचालयेदितितद्

रादिप्रतिष्ठापितव्यक्तिविषमनत्वदेवातद्व्यक्तिनाशेनतत्स्थापितेशातीतनताद्दशव्यक्तिविषयंजीर्णोद्धा रामः

रप्रकारोप्यन्नैव यान्येमंडपमार्गेवाप्रत्यग्द्वारेकतोरणे विधायपद्मरपूजादिस्थंडिलेसंप्रपूजनंद्वारपूजादि ७८९

शिवकुंभपूजांतमितेनिक्रमः मंत्रान्संतर्प्यसंपूज्यवास्तुदेवांस्तुपूर्ववत् दिग्बलिंचबहिर्दत्वासमाचम्य

स्वयंगुरुः ब्राह्मणान्भोजयित्वातुशंभुंविज्ञापयेत्ततः दुष्टलिंगमिदंशंभोशांतिरुद्धरणेस्यचेत् रुचिस्त

वास्तेविधिनान्रधितिष्ठचमेशिव एवंविज्ञाप्यदेवेशंशांतिहोमंसमाचरेत् मध्वाज्यक्षीरदूर्वाभिर्मूलेना

ष्टाधिकंशतं ततोलिंगंचसंस्थाप्यपूजयेत्स्थंडिलेतथा लिंगलिंगाधिष्ठितेदेवतास्थंडिलेसंस्थापयेत तर्प ॐ

व्यापकेश्वरायेतिनाम्नानेनशिवानां ॐव्यापकेश्वरहृदयायनमः ॐव्यापकेश्वरशिरसेस्वाहा ॐव्यापकेश्व

रशिखायैनमः इत्यादूंघंइत्यंगमंत्राः ततस्तत्राश्रितंमंत्रंवारयेदस्त्रबंधनं सर्वःकोपीहयःकश्चिल्लिंग

माश्रित्यतिलिंगंत्यक्त्वाशिवाज्ञाभिर्यत्रेष्टंतत्रगच्छतु विद्याविद्येश्वरैःशंभुंरत्रभविष्यति सहस्रंप्रति

भागंचततःपाशुपतास्त्रेणकृत्वाशंत्संबुनाप्रोक्ष्यपश्चात्तदुशोजपेत्ततः ब्रह्मशिलापिंडीलिंगात्मकदेव

ताभागत्रयंसंस्कारार्थंपाशुपतास्त्रेणकृत्वाशांतिकलशोदकेनदेवसंप्रोक्षणंकुर्यात् स्पष्टहोमंसंख्यायापा

शुपतमंत्रंजपेत् दत्वार्घ्यंचविलोमेनतत्वमत्वाधिपांस्ततः मूर्तिमूर्तीश्वरान्लिंगोपिंडिकासंस्थितान्गु

प्र.म.

॥३२॥

त्॥ विसृज्य स्वर्णपात्रे नव पस्कं दस्थया तथा रत्नाब ध्यानपानी त्वाशेवमंत्र गणान् त्रानैः ॥ तज्जलेनिक्षिपेन्मंत्री पुष्पं
यं जुहुयात्ततः ॥ तर्पयेद्दिक्पतीनां च वास्तुपुरुषदैवतान् शांतं ॥ रक्षां विधायतद्वाग्निमहापाशुपतास्त्रतः ॥ लिंगम
न्ततत्तस्स्थापयेद्विधिवत्कुरु ॥ विलोमेन पराङ्मुखसंज्ञकं ॥ तत्वतत्वाधिपन्मूर्तिमूर्त्तीश्वरावस्थिते ॥ सिद्धांता
दीश्वरे जीर्णे द्वारविधिंवदेपसमासात्रचोदितं ॥ ईशान्यां दक्षिणे चापिमंडपं पश्चिमामुखं ॥ कुर्वीत पू
र्ववत्सर्वं एकास्यैवैकतारणं ॥ पूर्ववस्तमादि ॥ द्वारपालार्चनं कुर्यात् ॥ तत्स्थंडिलस्थे त्रिवार्चनं ॥ द्वारपाला
र्चनं ॥ द्वारपालार्चनं मंडपप्रतिष्ठाप्रकारेण मंत्रेण तर्पणं कुर्यात्तत्र देवार्चनं तथा मंत्रेणं देवस्थापित
कलानां ॥ अंतबलिबलिं दद्याच्छिवभक्तांश्च भोजयेत् ॥ शिवभक्तानपंचेति त्रिविक्रमः ॥ द्विजान्कर्मकरान्शिष्य
ततो विज्ञापयेच्छिवं ॥ द्वेषैर्लिंगमिदं दुष्टं शांतिरस्तस्य वोहतौ ॥ तस्मादेनं विधानेन माधितिष्टमहेश्व
र जनवल्लितिवचस्तेन प्रोक्तं तज्ज्ञापयेद्गुरुं ॥ तेन शिवेन प्रोक्तं त्र्यांतिर्नवत्विति वचोगुरुर्नोवयेत् ॥ विज्ञाप्यैवं राम:
शिवं शिवं भक्त्या शांतिहोमं समाचरेत् ॥ मधुनाज्येन दुग्धेन दूर्वाभिर्मूलमंत्रतः ॥ शतमष्टाधिकं मंत्रे ॥ प्रत्येकं ७८६

जुहुयात्ततः ॥ मंत्रमूलमंत्रमुच्चार्येत्सर्पा ॥ त्रिमिश्रमधुरैर्माह्वैः समिधो घोरामंत्रत ॥ शांत्यर्थं वन्हुलं कुंडे सहस्रं जु
हुयात् गुरुः ॥ अथवा णजुहुयाद्याहुतिर्मिश्रपूर्णपा ॥ बध्नीयात्कंकणं हैमं लिंगस्योत्तानके करे ॥ लिंगस्यो
त्तानंकरं नावयित्वा तत्र हैमं कंकणं बध्नीयादित्यर्थः ॥ लिंगं संस्थाप्य संपूज्य पूर्वोक्तविधिना ततः ॥ सांगं संपूज
येद्भक्त्या स्थंडिलस्थापके श्वरं ॥ लिंगाश्रितानि भूतानि ताडयेदस्त्रमंत्रतः ॥ यानि कानि च भूतानि तिष्टत्याश्रित
लिंगकं ॥ सस्का शिवाज्ञया तानि वर्जंतं स्थानमीप्सितं ॥ विद्या विद्येश्वरैर्युक्तः शिवो लिंगे न विद्यति ॥ इति दत्वा
शिवस्याज्ञां ततो नाशयेद्गुरुः ॥ कृत्वा कृत्वा स्वमंत्रेण तथा पाशुपतास्त्रतः ॥ प्रतिभागसहस्रं च सिंचेच्छोतिघवे
छोतिघवेदकैः ॥ ब्रह्मशिलापिंडीलिंगात्मकदेवभागत्रयं संस्कर्तुं त्रिसहस्रेण कृत्वा तेनैव प्रतिभागं कलशा
सहस्राणाभिषिंचेदित्यर्थः ॥ मूलमध्याग्रकेदर्भैः स्पृष्ट्वा चनपमाचरेत् ॥ स्वब्रह्मशिलां मूलेन पिंडीमध्येन लिंग
मग्रेण दर्भैः स्पृष्ट्वेत्यर्थः ॥ प्रागवत्पाशुपतास्त्रं च जपेद्धोमस्य संख्यया ॥ सद्योजातादिवक्त्रेषद्दद्यादर्घ्यं पराङ्मुखं
दुष्टलिंगप्रतिपत्तिमाह ॥ सौधच्युतो परित्याज्य दारुजं चाग्निना दहेत् ॥ सौध सुधानिर्मितं लिंगं लोहजं तेन कार्यंसा

छेलजं चाप्सु निक्षिपेत् ॥ सुवर्णरूप्यलोहादिनिर्मितं भग्नं चेत्तेनैव सुवर्णादिना तत्कार्यमित्यर्थः ॥ नवतत्त्वेषु रात्रु लिं
गान्यूर्त्तिमूर्त्तिमत्तीर्थारानपि ॥ लिंगस्थानिस्त्यजेन्मंत्री पीठब्रह्मशिलागतान् ॥ वृषस्थानिस्त्यजे द्वंगमूर्त्तिस्थि
तानपि ॥ तत्तत्सुवर्णपात्रेऽनरज्वा गोचर्मजातया ॥ वृषस्कंधस्थया धालिंगं पीठं च चर्मणा ॥ शिवमस्त्विति तद्बाह्ये
जसनो प्याहरेद्गुरुः ॥ उद्धारार्थं च लिंगस्य तोद्वयो नेरये न्नतः ॥ वहिनी त्वा ततो लिंगं पीठं ब्रह्मशिलादृषः ॥ रथा
दिकं समारोप्य सम्रुद्रे निक्षिपेत्ततः ॥ स्थूललिंगो धृतो न शागजं वाप्रेरयेद्गुरुं ॥ सो धंन्त्मौ परित्यज्य दारुजं चानले
दहेत् ॥ सर्ववा निक्षिपेतो ये लिंगा वो प्रतिमादिकं ततः ॥ पाशुपतास्त्रेण शांत्यर्थं जुहुयाच्छतं ॥ लोकपालाणुभिस्तद्व
शात्तु शांत्यै वातं शतं ॥ प्रतिदैवतं शतं जुहुयादित्यर्थः ॥ रक्षां कुर्याच्च तद्धर्म्मं महापाशुपताणुना तन्मानतन्म
यं लिंग तत्र संस्थापयेत्तुनः ॥ प्रतिष्ठोक्तेन मार्गेण सर्वकर्म समाचरेत् ॥ हर्म्यस्य परिवाराणां ॥ प्राकारादेस्तु रामः
धृतौ सर्वेषामपि जीर्णानां एष वै विधिस्मृतः ॥ कर्त्तान्नदक्षिणां दद्याद्गुर्वादिभ्यो यथोदितं यत्तु एपस्थापने ॥७८९॥
पोक्तं तत्फलं मेतदुद्धृतौ ॥ अथ मन्त्रनिर्गलितोर्थः ॥ प्रद्रेमाजितः स्फटितविशीर्णात्यपचसेवितोनां लिंगानां

नादग्धानां वाऊंपादशिरः कर्णनासास्फुटितानां प्रतिमानां च विधक्ति प्रकारेण चालनजलादौ प्रतिपादनं
चकृत्वा नूतनप्रकारेण तस्मिन्नेव स्थाने पूर्वसजातीयद्रव्यनिर्मितं तन्मानं तदाकारलिंगं तादृशीं प्रतिमां च
स्थापयेत् ॥ अतिजीर्णमिति पूर्वोक्तायशीर्षवाक्यात् ॥ पीवच्च चालितं लिंगमिति ॥ तजेस्सदोषितं लिंमिति ॥ बा
हुपादशिरोदीनामिति ॥ पदद्वय यत्नमायांचेतिचे सिद्धांतशेखरोक्तं ॥ अस्मादेव वाक्यनिचयात्प्रतिपन्निप्र
योजकदोषाभावाद्ब्रसुप्तनिम्नविषमस्थदिग्मूढानां च वेधचालनं तेषामेव पुनःस्थापनं च ॥ भग्नचूर्णयो
स्तदपवादानां प्रतिपादिने पूर्वकं नूतनानां स्थापनं ॥ अनेकशाकलत्वेन चूर्णितत्वेन वोद्धारः पुनःस्थापनं वि
ध्योरपवृत्तौ ॥ चालितः ॥ चलित यातितपतितं ॥ मध्यस्थानां तु नोद्धारो न च स्यागः ॥ किंतु तेषामेव पुनः प्रस्थाप
नउद्धृतस्योद्धारासंभवो ऽतिदुष्टत्वेन प्रतिपत्तिविध्यप्रवृत्तेश्च ॥ एतेनैव तदीवेगोन्मत्तशत्रुचोरहस्त्याघष
हतानां समेतानेच पुनःस्थापनीयाति ॥ तेषाममृतानेतु तादृशान्यन्यानि स्थाप्यानि ॥ निषिद्धस्पर्शदूषितनिषि
द्धजनस्पृष्टविप्रष्टतजदूषितपतिताद्यर्चितश्लेष्मविण्मूत्रादिदूषितानां स्वस्थानास्थितानामेव पुनः

प्र॰म॰
॥३५॥

संस्कारोनोद्धारो नापि प्रतिपत्तिः स्मृतिजार्णमिति पीवाद्यचालिता मितिज्यते स्वदोषितल्लिंगमितिपूर्वोक्ताधा
नानिचयात् ॥ अनुद्दृतानामेव तत्रैव संस्कार संभवात् स्थानांतरनयनविधानाबाद्य ॥ एतेन स्वस्थाना द्वचलि
तस्याविकृतस्य च विधिकृत दग्धादेरप्येवमेव व्यवस्थास्थानाद्यलितस्यतु उनः तत्रैव प्रतिष्ठास्थानांतरवि
धानाभावाच्चलितस्यावि कृतस्यच त्यागस्ता दृशस्यासस्य प्रतिष्ठा च स्थले पूर्वपिंडीब्रस्त शिलाद्युद्धार ॥ प्रति
पत्तिर्विधिना पिंडिकांतरादिनिवेशश्च ॥ व्यंगेतु पूर्वपिंडिकादीनां नष्टत्वे एवमेव ॥ पिंडिकाद्यन्यावेतु पिंडिकाद्य
तरस्थापनमात्रमित्यादि दुष्टलिंगानामित्यग्निपुराण वा क्वाचित्लिंगेपीवादिके वा पीतिमि द्यांतरोरवर वा क्यात्
पूर्वपीठ परित्यज्येनिह्य यशीर्षवाक्याच्च ॥ सुवर्णदिभिर्मितं भंगादे तु जैनैव सुवर्णादिना तादृशेतावत्सरिमाणं
चलिंगादि कृत्वा तत्रैव पुनः स्थाप्यं ॥ यद्दितेच सुवर्णादिना तादृशं कर्तुं न शक्यते तदा समुद्रे निक्षिपत् ॥ रत्नजा
तु समुद्र एव क्षेप्तव्या ॥ रत्नजायादेर्दग्धापि स्वर्कीकां तिं नजाहातितदासैव स्थाप्येति त्रिविक्रमः ॥ लोहाद्यच्छि
न्नभिन्नागं इतिसिद्धांतशेखरवाक्यात् ॥ धातुजारत्नजावापीतिह्यशीर्षवाक्यात् ॥ इतिजीर्णोद्धारविधि

राम॰
॥७९॥

॥ अथास्य प्रयोगः ॥ यजमानउद्धार्याद् हिंगस्यामीशान्यां वा पश्चिमद्वारे का तोरणमंडपं तन्मध्ये भागे वेदिं पू
र्वभागे वर्तुलं चतुरस्रं वाकुंडं स्थंडिलं वा पश्चिमे वास्तुपीठमुत्तरे वालुकयास्थंडिलं च कृत्वा कालादिस्मृत्वो मै
लफलाच्छतगुण फलकमोऽस्य प्रतिमायां तु दशगुणफलकामो वाजीर्णादिदोषदुष्टस्य लिंगस्य प्रतिमाया
वाउद्धारमुख्य यणं वा करिष्ये इति संकल्पयेत् ॥ पिंडिकावृषगरुडप्रासादकलशेषु तु ईश्वरप्रीतिकाम
इति विशेषः ॥ सर्वत्रेश्वरप्रीतिकामो वा ॥ ततो गणेशपूजास्वस्तिवाचनमातृपूजानांदीश्राद्धानि कृत्वा प्रतिष्ठाव
त् कृत्वा तद्देवब्रह्माचार्य सदस्यान् द्वात्रिंशच्छोडशाष्टौ चतुरो वा ऋत्विजो द्वारपालांश्चाष्टौ चतुरो वा वृत्वा
वस्त्रालंकारमधुपर्कादिभिस्तान् पूजयेत् ॥ अथाचार्यो मंडपपूजां दिक्षिवकुंभंपूजां तं कृत्वा वास्तुमंड
लेमहावेद्यां च देवतास्थापनं कृत्वा पीठादौ प्रणवेनासनं दत्वाॐव्यापकेश्वराय एह्येहि नमः ॐव्यापकेश्वरहृ
दयायनमः ॥ व्यापकेश्वरशिरसे स्वाहा ॥ व्यापकेश्वरशिखायै वौषट् ॥ व्यापकेश्वरकवचाय हुं ॥ व्यापकेश्वर
नेत्रत्रयाय वौषट् ॥ इतिमंत्रैः शिवमर्चयेत् ॥ देवतांतरोद्धारे मूलमंत्रेणार्चयेत् ॥ ततो द्विसंस्थाप्यलिंगचा

प्र॰म॰
॥३५॥

लनार्घम्मूलमंत्रेणतिलाज्यतिसहस्रंहुत्वा मंडलदेवताहोमं पूर्णाहुतिंचकृत्वाजीर्णमग्नविद्दंदेवसर्वदोषा
वहं नराणां॥ अस्योद्धारेकृतेशांतिशास्त्रेस्मिन्कथितात्वया जीर्णोद्धारविधानंचन्नपराष्ट्रविवर्द्धनं तदत्रा
धिष्ठितान्देवप्रोद्धरामितवाज्ञयेति॥ देवस्पृजासर्वदोषंश्रावयित्वात्रिर्जप्त्युत॥ सांगाशिवंविसर्ज्ययजमान
स्यसौवर्णकंकणंबध्वासौवस्त्ररवनित्रेण भृत्यस्यमारोप्यतत्स्थापेपर्यंतदेवद्वामूले अगाधनदीह्रदे
वावामदेवेक्षिपेत॥ प्रतिमांतुप्रणवेनक्षिपेत॥ दारुजंचेतरेदहेत॥ रत्नजेलिंग्येदिनिजकांतिममदेवभवे
तितद्वादेवपूर्ववत्स्थापयेत॥ सुवर्णादिमयंतदेवसाग्रंकृत्वास्थापयेत॥ प्रासादेत्वयंविशेषः॥ प्रसादेमंत्रा
न्खड्गेछुरिकायांवासंयोज्य नूतनप्रासादसिद्धेपर्यखड्गादिकमर्चयित्वा प्रासादंस्थिडिरखड्गादिमंत्रान्यथा
स्थानप्रतिष्ठाष्टाकालेन्यस्ययजमानमभिषिंचेत॥ ततोयल्लिंगंप्रतिमांवांतत्रैवविधिवसंस्थाप्यध्रुवाद्यौ
रित्यादिमंत्रान्पठित्वास्थिरीकृत्यवरुसंपूज्यप्रार्थयेत॥ ज्ञानतोवापिगत्वाज्ञं नकृतं यद्धितत्सर्वंपूर्णमे
वास्तुत्वत्प्रसादान्महेश्वर॥ कर्तुराज्ञप्रजानांचरक्षांतिर्भवतुसर्वदा अस्माकंशिल्पिनानैवसुप्रीतोभव

राम:
॥७९२॥

प्र॰म॰
॥३६॥

सर्वदेति॥ इतिश्रीशंकरभट्टात्मजभट्टनिलकंठेनकृतेभास्करेप्रतिष्ठामयूखः समाप्तः॥ अदृष्टभावा
न्मममेतिचित्तंपदार्थहीनंलिखितंमयात्र॥ तत्सर्वमार्यैःपरिशोधनीकोपंनकुर्यात्खलुलेखकस्य॥ १॥ व्यास
तुल्योपियोवक्तालेखगोगणनायकः॥ तथापिचलतेचित्तंकाकथाइतरेजनाः॥ २॥ अपरंपुस्तकंवीक्ष्यशोध
नीयंसदाबुधैः॥ न्यूनाधिकैःस्वरैर्वर्णैरस्माकंदूषणंनहि॥ ३॥ शिवमस्तुसर्वजगतःपरहितनिरताभवंतुभू
तगणाः॥ दोषाःप्रयांतुनाशंसर्वत्रसुखीभवतुलोकः॥ १॥ शुभंभवतुकल्याणंलेखकपाठकयोः शुभं
शुभंभावयतेप्रोक्तंशुभंस्यात्तेनरोत्तमे॥ २॥ शुभंभवतु॥ कल्याणमस्तु॥ श्रीरस्तु॥ ॥ छ ॥ ॥ श्री ॥

राम
७८

॥ १५

प्रतिष्ठामयूखः